पाक्षिकः संस्कृतप्रभातम्, इन्दिरा एकादशी भाद्रपदः कृ.११ शुक्रवासरे युगाब्दे ५११६; दक्षिणायण, अंकः ६ वर्षः १ दि. १९ सप्टेम्बरः२२०१४

# संस्कृतप्रभातम्

## सम्पादकियम्

साम्प्रतकाले सर्वे जनाः शान्तिं इच्छन्ति परन्तु केन उपायेन तां प्राप्तं करणीया इति कोऽपि न जानाति । बहवः उपायाः सन्ति परन्तु कलियुगे कः उपायः इति न्यूनाः जनाः जानन्ति। ते के? ते वैष्णवाः अन्यजनाः शान्त्यर्थं सुखार्थं च विविध ान् उपायान् उक्त्वा जनान् भ्रमयन्ति । ते वदन्ति लङ्घनं कुर्वन्तु, यज्ञं कुर्वन्तु, दानं कुर्वन्तु, ध्यानं कुर्वन्तु इति। किन्तु एते उपायाः कलियुगे समर्पकाः न सन्ति । भागवतम् १२.३.५२ वदति- *कृते यद् ध्यायतो विष्णुं त्रेतायां यजतो मखैः। द्वापारे परिचर्यायां कलौ तद् हरिकीर्तनात्* // एतस्मिन् श्लोके विविधेषु युगेषु भगवद्भक्तीं कथं करणीया इति ज्ञानं अस्ति । सत्ययुगे श्रीहरेः ध्यानं । द्वापारयुगे श्रीविग्रहस्य अर्चना । त्रेतायुगे विशालाः यज्ञाः। कलियुगे तु श्रीहरिनामस्य संकीर्तनं एव । विष्णुपुराणम् ६.२.१७ पद्मपुराणम् उत्तरखण्ड ७२.२५ बृहन्नारदीयपुराणम् ३८.९७ च एकः श्लोकः वदन्ति - *ध्यायन् कृते यजन यज्ञैस्त्रेतायां द्वापारेऽर्चनेन / यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवं* // अत्र अपि स्पष्टम् अस्ति । केशवस्य कीर्तनं । केशवः अर्थात कृष्णः । कृष्णः अपि स्वयं वदति - *नाहं तिष्ठामि वैकुण्ठे योगिनां हृदयेषु वा / तत्र तिष्ठामि नारद यत्र गायन्ति मद्भक्ताः* // नारदमुनि बृहन्नारदीयपुराणे ३८.१२६ उक्तवान् - *हरेर्नाम हरेर्नाम हरेर्नामैव केवलम् / कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा* //अर्थात् हरिनाम विना कोऽपि उपायः नास्ति । भगवद्गीतायाम् अपि श्रीकृष्णः उक्तवान " *सततं कीर्तयन्तो माम्*" । श्रीपाद शंकराचार्य उक्तवान् "*भज गोविन्दं भज गोविन्दं गोविन्दं भज मूढमते*" । कलिसन्तरणोपनिषदे ब्रह्मा-नारद संवाद अस्ति । तत्र नारदमुनि ब्रह्मां कलियुगस्य कल्मषहान्यर्थं पृच्छति । ब्रह्मा तत्र एषः मन्त्र वदति " हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे । हरे राम हरे राम राम राम हरे हरे ।।

अतः इस्कॉनसंस्थायाः मन्दिरेषु जनकल्याणार्थं विश्वशान्तये च एतस्य मन्त्रस्य जपः कीर्तनं च नित्यं चलति । प्रतिवर्षे सप्टेम्बर मासे विश्व हरिनामोत्सव अस्ति। एषः उत्सवः दसदिनानि चलति । एतस्मिन् उत्सवे हरिनामस्य जपः कीर्तनं च अखण्डं चलति । एतस्मिन् वर्षे सप्टेम्बर मासे पञ्चतः पञ्चदशापर्यन्तं विश्व हरिनामोत्सव आसीत् । बहवः नूतनाः जनाः मन्दिरम् आगतवन्तः हरिनाम श्रुत्वा सुखस्य शान्तेः च अनुभव कृतवन्तः । अतः विश्वशान्ति प्राप्त्यर्थं हरिनाम एव उपायः इति सत्यम् ।

## प्रार्थना

नामसङ्कीर्तनं यस्य सर्वपाप प्रणाशनम् ।
प्रणामो दुःखशमनस्तं नमामि हरिं परम् ।।

अनुवाद -यस्य नाम्नां सङ्कीर्तनं सर्वदा सर्वाणि पापनि नष्टं करोति, यस्य चरणौ वन्दनं सर्वेषां दुःखानां शमनं करोति तं भगवन्तं श्रीहरिं अहं नमामि।



## सम्भाषणम्

लतिका - चित्रक ! भवान् प्रातः कदा उत्तिष्ठति?
चित्रकः - लतिके ! अहं प्रातः पञ्चवादने उत्तिष्ठामि ।
लतिका - प्रातः भ्रमणाय कदा गच्छति ?।
चित्रकः - प्रातः भ्रमणाय षडवादने गच्छामि ।
लतिका - विद्यालयं कदा गच्छति ?
चित्रकः - विद्यालयं सप्तवादने गच्छामि।
लतिका - भवतः विद्यालये ग्रन्थालयम् अस्ति वा?
चित्रकः - आम! मम विद्यालये विशालं ग्रन्थालयम् अस्ति।
लतिका - आम! अहं भवतः विद्यालयं गत्वा ग्रन्थालयम् द्रष्टुम् इच्छामि ।
चित्रकः - कृपया आगच्छतु । स्वागतम् !

## सुभाषितम्

सर्पः क्रूरः खलः क्रूरः सर्पात् क्रूरतरः खलः । सर्पः शाम्यति मन्त्रैश्च दुर्जनः केन शाम्यति ।।

अनुवाद - सर्पः दुर्जनः च क्रूरः । किन्तु एतयोः दुर्जनः अधिकः क्रूरः । सर्पः मन्त्रैः शान्तं भवति किन्तु दुर्जनः केनोऽपि उपायेन न ।।

## चिन्तनीयम्

-- कः पञ्जरमध्यास्ते -- कः परुषनिस्वनः ।
--कः प्रतिष्ठा जीवानां -- कः पाठोऽक्षरच्युतः ।।

धीरशांत दासः, कनाई कृष्ण दासः, प्रकाशनं मुद्रणं च संकेत- पाक्षिकः संस्कृतप्रभातम्, हरे कृष्ण चौक, ५० गोकुलनगरे कोंढवा - पुणे-४८
अणुपत्रम् संकेत d16108@gmail.com. भ्रमणध्वनी-८८८८८४४६४८/९४२३२३४४३०

## अखण्डविश्वासः

महाभारतयुध्दम् आरब्धम् आसीत् । भीष्मः कौरवाणां सेनापतिः भूत्वा अष्ट दिवसान् यावत् भयङ्करं युध्दं कृतवान् । पाण्डवाः तस्य पुरतः युध्दं कर्तुम् असमर्थाः चिन्तामग्नाः आसन् । तथापि भीष्मः पाण्डवेषु एकमपि न मारितवान् इति मत्वा दुर्योधनः खिन्नः आसीत । अतः सः भीष्मं दृष्ट्वा अवदत् - "भोः पितामह ! मदपेक्षया पाण्डवाः एव भवतः प्रियाः । अतः भवान् युध्देऽपि तैः सह क्रीडति । न कमपि मारयति" इति । एतत् श्रुत्वा भीष्मः दुःखितः जात । झटिति सः प्रतिज्ञां कृतवान् यत् "श्वः युध्दं कृत्वा अहम् अर्जुनं मारयिष्यामि । अथवा तेन पराजितः वा भविष्यामि" इति । भीष्मस्य प्रतिज्ञा सर्वैः ज्ञाता । तां श्रुत्वा पाण्डवपक्षे सर्वेऽपि वीराः चिन्तिताः अभवन् । श्रीकृष्णः अपि चिन्तावशात् रात्रौ निद्रां न प्राप्तवान् । 'भीष्मप्रतिज्ञां ज्ञात्वा अर्जुनः तु नितरां चिन्तितः स्यात्' इति चिन्तयित्वा सः तस्य सान्त्वनं कर्तुम् अर्जुनस्य सेनाशिबिरं गतवान् । परन्तु श्रीकृष्णस्य महत् आश्चर्यं सञ्जातम् । यतः यदा सः गत्वा दृष्टवान् तदा तत्र अर्जुनः गाढनिद्रायां मग्नः आसीत् । सः अर्जुनम् उत्थाप्य पृष्ठवान् - "भोः पार्थ ! किं भवान् भीष्मस्य प्रतिज्ञां न श्रुतवान्?" इति । "श्रुतवान्" इति उक्तवान् अर्जुनः । "तर्हि तां श्रुत्वापि कथं भवान् चिन्तितः नास्तिः ? मृत्युभयात् उद्विग्नः नास्ति ?" इति श्रीकृष्ण पृष्टवान् । अर्जुनः किञ्चित हसित्वा शान्तस्वरेण उक्तवान् "भगवन ! अहं सम्यक् जानामि यत् यः मम योगक्षेमस्य चिन्तां करोति सः जागरणं कुर्वन् अस्ति इति । एवं सति अहं किमर्थं चिन्तां कृत्वा दुःखितः भवामि ? स्वस्य भक्तस्य भीष्मप्रतिज्ञायाः रक्षणभारः भगवतः भवतः एव । मम का चिन्ता तत्र? अतः एव अहं निश्चिन्ततया निद्रां कृतवान् अस्मि" इति । सत्यं खलु ! अर्जुनस्य एतादृशं दृढं विश्वासं मत्वा एव श्रीकृष्णः पार्थसारथिः अभवत् !



### ५ पदरञ्जन्याः उत्तरम्

| | | | | | |
|---|---|---|---|---|---|
| १का | य | ■ | २म | ३श | ४क |
| ५न | कु | ल | ■ | ६श | रः |
| न | ■ | ७गो | ८द | कः | ■ |
| ■ | १०क | म | र | ■ | ११चि |
| १२व | ल | य | म् | ■ | क्षु |
| १३सा | य | म् | ■ | १४हा | रः |

### पदरञ्जनी ६

| | | | | | |
|---|---|---|---|---|---|
| १ | | | २ | | ३ |
| ४ | | | | ■ | |
| ५ | | | | ■ | |
| | ■ | ■ | ■ | ६ | ■ |
| ■ | ७ | | ■ | ८ | ९ |
| १० | | | ■ | ११ | |

<u>दिगंतसम शब्द</u> -१. एषा हरितका अङ्गुलि सदृशा । ४. त्रिणि वर्षस्य । ५. अश्वान् बहु रोचते । ७. वा, अथवा । ८. अन्यत्र, दूरः। १०. कामुकः । ११. अङ्कगणणापृच्छा शब्द ।

<u>ऊर्ध्व शब्द</u> - १. चौर । २. हरितपर्णस्य व्यञ्जनम् ३. कृपण, तुच्छ । ६. गृहे प्रकाशं ददाति सः ७. मृत्यूदेवता ।९. दान, कृपा ।

## विनोदः

<u>मायावादी - (</u>चिन्तयित्वा) मम प्रचारः करणीयः अहं भित्त्यां लिखामि "सोऽहम्" ।

<u>भक्तः</u> - (दृष्ट्वा) मम अपि प्रचार करणीयः अहं अग्रे "दा" लिखामि। "दासोऽहम्" भविष्यति ।

<u>मायावादी</u> - (दृष्ट्वा) मम पदे कः परिवर्तनं कृतवान? अहं अग्रे "स" लिखामि । "सदासोऽहम्" भविष्यति ।

<u>भक्तः</u> - (दृष्ट्वा) उत्तमं । अहं अग्रे "दा" लिखामि । "दासदासोऽहम्" इति सम्यक भविष्यति।

दा स दा सोऽहम्



